ॐ

पण्डितकेशवभट्टज्योतिर्विदा

संस्कारशोधनाभ्यां सम्पादिता

इयम्

शिवसूर्ययोःसहस्रनामावली ।

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा

श्रीसप्तर्षिसंवत्सरे ५०११ विक्रमवत्सरे १९९२

ईस्वी वत्सरे १९३५

परोपकाराय प्राकाश्यं नीता ।

मूल्यं आनकपञ्चकम् ।-)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

हमारे क्रेयपुस्तक मिलनेका पता:—

पं० केशवभट्टज्योतिषी पाठशालाटीचर, जिल्ला रैणावारी, महल्ला भागज्योगीलङ्गार, कश्मीर—श्रीनगर.

१ नित्यकर्मविधिः'नं. १ (स्नानविधि सन्ध्या-नैवेद्यमन्त्र-भोजनविधि-पञ्चगव्यविधि हिन्दी भाषायां इतिकर्तव्यता सहितः ब्राह्मीविद्या च) ... ... ≡)

२ नित्यकर्मविधिः नं. २ (नं, १ विषय, तथा विष्णुपञ्चायतनपूजा-गणेशकवच-गुरु-गायत्री-गौरीस्तुतिमुकुन्दमालासहितः) ... ... ।≡)

३ नित्यकर्मविधिः नं. ३ (नं. २ के विषय तथात्रैवर्ण्यवर्णाश्रमाचारशिक्षा-जन्मोत्सवपूज्यपूजा—जन्माष्टमीपूजा जयनारायण-व्याप्तचराचर-अतिभीषण-बहुरूपगर्भोपयोगि स्वच्छन्दध्यानं च) त्रिपञ्चनयनं देवमिति ।≡)॥

४ शिवपूजा (बहुरूपगर्भ-महिम्नःपार-शिवकवच-शिवनिर्वाण-व्याप्तचराचर-अतिभीषण-षडक्षर-पञ्चाक्षर-दीनाक्रन्दनशिवापराधक्षमापन-कैवल्योपनिषत्-शिवपूजागणेशस्तवराजात्मका) ... ... ।≡)

५ गणेशदुर्गास्तोत्रावली (लाक्षासिन्दूर-अद्रिराजज्येष्ठपुत्र एकदन्तमीशपुत्र इति गणेशस्तोत्रत्रय-गणपतिविद्या-देवीध्यानरत्नमाला-शारिकास्तोत्र-ब्राह्मीविद्यात्मिका) ।–)

६ सौन्दर्यलहरी (पञ्चस्तवीसमेता) ... ... ।–)

७ देवीपूजा (देवीपूजा-राज्ञीस्तुतिः "याद्वादशर्क"-साहिभरुपभवानीवाक्यमञ्जरी-सरस्वतीस्तुतिश्च) ... ।–)

८ चमानुवाक्यम् ... ... =)

९ रुद्रपञ्चकम् (रुद्रमन्त्र-चममन्त्र-सौमारुद्र-दीक्षा-शताध्यायात्मकम्) ... ... ।)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

सूर्यसहस्रनामावलिः ।

श्रीदेव उवाच । शृणु देवि प्रवक्ष्यामि सूर्यनामसहस्रकम् । यस्य तु पाठमात्रेण सर्वे नश्यन्ति चामयाः ॥ अस्य श्रीसूर्यसहस्रनाममन्त्रस्य, ब्रह्माऋषिः, गायत्रं छन्दः, सूर्यो देवता, ह्रांबीजं, ह्रीं शक्तिः, सःकीलकं आत्मनोवाङ्मनःकायो० होमे विनियोगः ॥ ह्रांहृदयायनमः ॥ ध्यानं ॥ प्रत्यक्षदेवं विशदं सहस्रमरीचिभिः शोभितभूमिदेशम् । सप्ताश्वगं सद्ध्वजहस्तमाद्यं देवं भजेऽहं मिहिरं हृदब्जे ॥ भास्कराय विद्महे सहस्ररश्मये धीमहि । तन्नः सूर्यः प्रचोदयात् ॥ ३ ॥ ॐह्रांह्रींसः सूर्यायस्वाहा ॥ ॐभगवते, सर्वलोकेशाय, भूतेशाय भूतभावनाय, भूतात्मने सृष्टिकर्त्रे सृष्टिहर्त्रे जगत्पतये, आदित्याय वरप्रदायँ, वीराय वीरलाय विश्वदीप्ताय विश्वकृते विश्वहृते भक्ताय भोक्त्रे भीमाय, भयापहाय विश्वात्मँने पुरुषाय साक्षिणे परंब्रह्मणे परमात्मने प्रतापवते विश्वयोनये विश्वेशाय विश्वतोमुखाय कामिने योगिने महाबुद्धये महसे मनवे अव्ययाय प्रजापतये विश्ववन्द्याय वन्दिताय भुवनेश्वराय, भूतभव्यभविष्यात्मने तत्त्वात्मँने ज्ञानवते गुणिने सात्त्विकाय राजसाय तामसाय तपस्विने करुणानिधये सहस्रकिरणाय भास्वते भार्गवायँ भृगवे ईश्वराय निर्गुणाय निर्दयाय नित्याय नित्यानन्दाय, निराश्रयाय, तपस्विने कालकृते कालायँ कामनीयतनवे कृशाय दुर्दर्शाय सुदर्शनाय दाशार्हाय दीनबन्धवे दयाकराय द्विभुजाय अष्टभुजाय धीरायँ दशबाहवे दशातिगाय दशांशफलदाय, विष्णवे जिगीषवे, जयविजयिने जटिलाय निर्मायाय, भानवे पद्महस्तायँ कुशीर-

१६

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

काय समाहितगतये धात्रे विधात्रे कृतमङ्गलाय मार्तण्डाय लोकभृते त्रात्रे रुद्राय भद्रप्रदाय प्रभवे अरातिशमनाय शान्ताय शङ्कराय कमलासनाय अचिन्त्यवपुषे श्रेष्ठाय महाचीनक्रमेश्वराय महार्तिदमनाय 'तेजोऽसि ।'' ॐदान्ताय-स्वाहा ॥ ध्यानं ॥ ॐमहामोहहराय हरये नियतात्मने कालेशाय दिनेशाय भक्तवत्सलाय कल्याणकारिणे कामदाय कर्कशाय कामवल्लभाय सामगाय पञ्चमाय द्रव्याय ध्रुवाय दीनजनप्रियाय त्रिजटाय रक्तवाससे रक्तवाहनाय रतिप्रियाय कालयोगिने महानादाय निश्चलाय अदृश्यरूपधृते गम्भीरघोषाय निर्घोषाय घटहस्ताय महामायाय रक्ताम्बरधराय रक्ताय रक्तमाल्याय अनुलेपनाय सहस्रहस्ताय विजयाय हरिगामिने हरीश्वराय मुण्डाय कुण्डिने भुजङ्गेशाय रथिने सुरथपूजिताय न्यग्रोधवासिने न्यग्रोधाय वृक्षकर्णाय ऊरून्धराय शिखिने दण्डिने जटिने ज्वालिने ज्वालाय तेजोमयाय विभवे हेमाय हेमकराय हारिणे हरिद्रतासनस्थिताय हरिदश्वाय जगद्वासिने जगतांपतये इङ्गलाय विरोचनाय विलासिने विरूपाक्षाय विकर्तनाय, विनायकाय विभासाय भासाय भासांपतये पतये मतिमते रतिमते शोभनाक्षाय विशालाक्षाय विशांपतये बालरूपाय गिरिचराय गीर्पतये गोमतीपतये गङ्गाधराय गणाध्यक्षाय गणसेव्याय गणेश्वराय गिरीशतनयावासिने सर्ववासिने सतीप्रियाय सत्यात्मकाय सत्यधराय सत्यसन्धाय सहस्रगवे अपारमहिम्ने मुक्ताय मुक्तिदाय मोक्षदायकाय अमूर्तिमते दुर्दराय मूर्ताय तुटिरूपाय लवात्मकाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्राणेशाय "तेजोसि" ॐव्यानायस्वाहा ॥ ध्यानं ॥ ॐअपानाय स्वाहा, समानाय उदानरूपवते पक्षाय मासाय ऋतवे वर्षाय दिनकालेश्वरेश्वराय अयनाय युगरूपायँ कृतिने त्रेतायुगाय त्रिपादे द्वापराय कलियुगाय कालाय कालात्मने कलिनाशनाय मन्वन्तरात्मकाय देवायँ चक्राय त्रिभुवनेश्वराय वासवाय अग्नये यमाय रक्षसे वरुणाय यादसांपतये वायवे वैश्रवणायँ शैवाय गिरिशाय जलजासनाय अनन्ताय अनन्तमहिम्ने परमेष्ठिने गतज्वराय कल्पान्तकालाग्नये क्रूराय कालायँ दावाग्नये कालसूदनाय महाप्रलयकृतिने कृत्याय कृत्याशिने युगवर्तनाय कालवर्तनाय युगधराय युगादये शर्वरीश्वरायँ आकाशनिधिरूपाय सर्वकालप्रवर्तकाय अचिन्त्याय सुबलाय बालिकावल्लभाय वराय वरदाय वीर्यदाय वाग्मिने वाक्पतये वाग्विलासकाय साङ्ख्येश्वराय वेदरम्याय मन्त्रेशाय तन्त्रनायकाय कुलाचारपराय नुत्याय स्तुतितुष्टाय नतिप्रियाय आलसायँ तुलसीसेव्याय तुष्टाय रोगनिवर्हणाय प्रस्कन्दनाय विभागाय नीरगाय दशदिक्पतये वैराग्याय विमानस्थाय रक्तकुम्भधरायँ आयुधाय महापादाय महाहस्ताय महाकायाय महाशयाय ऋग्यजुषे सामरूपाय त्वष्ट्रे अथर्वधामशाखिलाय सहस्रशाखिने सदऽसते व्यक्ताय महाकल्पप्रियाय पुंसे कलावृक्षाय मन्दिराय मन्दराचलशोभनाय मेरवे हिमालयाय "तेजोसि" ॐमालिने स्वाहा ॥ ध्यानं ॥ ॐमलयायस्वाहा मालयद्रुमाय सन्तानाय कुसुमच्छिन्नाय सन्तानफलदाय विराजे क्षीराम्भोधये घृताम्भोधये जलधये क्लेशनाशनायँ रत्नाकराय महामान्याय वेणवे वीणाधराय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

वणिजे वसन्ताय सरसामऽन्ताय ग्रीष्माय कल्मषनाशनाय वर्षाकालायँ वर्षपतये शरदम्भोजवल्लभाय हेमन्ताय हेमकेयूराय, शिशिराय शिशुवीर्यदाय सुमतये सुगतये साधवे विष्णँवे सस्वराय अम्बिकासुताय सारग्रीवाय महाराजाय सानन्दाय नन्दिसेविताय सुमेरुशिखरवासिने सप्तपातालगोचराय आकाशचारिणे नित्यात्मँने विभवे विजयप्रदाय कुलकान्ताय कुलाद्रीशाय विनयाय विजयिने नियताय विश्वम्भराय वियच्चारिणे वियद्रूपायँ वियद्रथाय सुरथाय सुगतये स्तुत्याय वेणुवादनतत्पराय गोपालाय गोपतये गोप्त्रे प्रतिष्ठायै प्रजापतँये आवेदनीयाय वेदाक्षाय महादिव्यवपुषे सुराजे निर्जीवाय जीवनाय मन्त्रिणे महार्णवाय निनादभृते वासनायँ आवर्तनाय नित्याय सर्वनाम्ने प्रभवे स्वधिये न्यायनिर्वापणाय शूलिने कपालिने पद्ममध्यगाय त्रिकोणनिलयायँ देवदेवाय बिन्दुमण्डलमध्यगाय बहुमालाय महामालाय दिव्यमालाधराय अजपाय जपाकुसुमसङ्काशाय जपपूजाफलप्रदाय सहस्रमूर्ध्ने देवेन्द्रायँ सहस्रनयनाय रवये सर्वतत्त्वाश्रयाय ब्रध्नाय वीरवन्द्याय विभावसवे विश्वावसवे वसुपतये वसुनाथाय "तेजोसि" ॐविसर्गवतेस्वाहाँ ।।

ध्यानं ।। ॐआदयेस्वाहा आदित्यलोकेशाय सर्वगामिने कलाश्रयाय भोगीन्द्रशय्याय देवदेवेन्द्राय नरेन्द्राय हव्यवाहनाय विद्याधराय विद्येशायँ यक्षेशाय रक्षणाय गुरवे रक्षायै कुब्जैकवरदाय गन्धर्वकुलपूजिताय अप्सरोवन्दिताय जयाय जेत्रे दैत्यनिवर्हणायँ गुह्यकेशाय पिशाचाय किन्नरपूजिताय कुलजाय सिद्धसेव्याय समाम्नायाय साधुसेव्याय सरित्पतये ललाटाक्षाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

विश्वदेवायँ नियमाय नियमेन्द्रियाय अर्काय अर्ककान्ताय रत्ने-
शाय अनन्तबाहवे लेपकाय अलिपात्रधराय अङ्गनाय अम्बरे-
शायँ अम्बरेशयाय अकाराय मातृकानाथाय आदिदेवनाम्ने
देवानामादये आकृतिने आरोग्यकारिणे आनन्दविग्रहाय
ग्रहाय आलोककृँते आदित्याय वीराय अदितिप्राणाधिकाय
आकाशरूपाय स्वाकाराय इन्द्रादिस्वरपूजिताय इन्दिरापूजिताय
इन्दवे इन्द्राय लोकत्रयाश्रयायँ इनाय ईशानाय चन्द्राय ईशाय
ईशानवल्लभाय उन्नतास्याय उन्नतवपुषे उन्नताङ्घ्रिचराय गुरवे
उत्पलायँ उच्चलत्केशवते उच्चैर्हयाय गतये सुखिने उकाराय
अकारसुखिताय ऊष्माय निधिभूषणाय अनूरुसारथिने उष्ण-
भानवे ऊकारवल्लभाय ऋणहस्ताय ऋलिहस्ताय ऋऋभूषणाय
भूपिताय ऌप्ताङ्गाय ऌआसनस्थाय, ॡॡगण्डयुगोज्ज्वलाय
एणाङ्काय अमृतदायँ चीनपट्टभृते बहुशश्वराय एकचक्ररथाय
एकाय अनेकचक्षुषे एकदेवाय एकवीजरमणाय एऐओष्टाय अ-
मृताकराय "तेजोसि" ॐवैकर्तनायस्वाहा ॥ ध्यानं॥ ॐकारका-
रणायस्वाहा, ब्रह्मणे औकारौचित्यमण्डनाय ओऔदन्तालिर-
ञ्जिताय महते महतांपतये अविद्याभूषणाय भूष्याय लक्ष्मीशाय
बीजरूँपवते अप्स्वरूपाय स्वरमयाय सर्वस्वरपरात्मकाय अंअः-
स्वरूपमन्त्राङ्गाय कलिकालनिवर्तकाय कर्मणे एकवरदाय कर्म-
साक्षिणे कल्मषनाशनाय कँचध्वंसिने कपिलाय कनकाचलचा-
रकाय कान्ताय कामाय कपये क्रूराय कीर्णाय केशिनिषूदनाय
कृष्णाय कँपालिने कपालमोचकाय काशाय कश्मीरघनसारभृते
कूजत्किन्नरगीतेष्टाय कुलराजाय कुलन्धराय कुलवासिने कुल-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

कौलेशाय ककाराक्षरमण्डनाय खंवासिने खेटकेशाय खण्ड-
मुण्डधराय खगाय खगेश्वराय खेचराय खेचरीगणसेविताय
खरांशवे खेटकधराय खलहस्ताय खवर्णाय गन्त्रे गीतप्रियाय
गेयाय गयावासिने गुणाश्रयाय गुणातीताय गोलोकगतये
गुच्छलाय गुणसेविताय गदाधराय पद्मधराय गाङ्गेयवरप्रदाय
प्रयोगिने गिङ्गिलाय गटिलाय गान्ताय गकाराक्षरभास्कराय घृ-
णिमते घुर्घुराराबाय घण्टाहस्ताय घटाक्षराय घनच्छिन्नाय घनग-
तये घनवाहनतर्पिताय ङान्ताय ङेशाय ङकाराङ्गाय चन्द्रधराय
अच्युताय चम्पकसन्निभाय चामीकररुचये चण्डभानवे चण्डीव-
ल्लभाय चञ्चाय चकोरकोष्टाय चपलाय चपलाश्रयाय चलत्पता-
काय चण्डांशवे चीवरैकधराय चराय वर्णभृते छत्रभृते हलहृते छ-
न्छाय च्छुरिकाच्छिन्नविग्रहाय जाम्बूनदाङ्गदाय जिनेन्द्राय जि-
नैकवल्लभाय "तेजोसि" ॐजम्भारयेस्वाहा ॥ ध्यानं ॥ ॐजङ्गिलाय
स्वाहा,जङ्गिने जनोलोकतमोपहाय जयकारिणे जयहर्त्रे जरामृत्यु-
विनाशकाय जगत्त्रात्रे जगच्छ्रेयाय जगन्निधये जगत्साक्षिणे जग-
च्चक्षुषे जगन्नाथाय जिताय जकाराकारमुचे झञ्झाच्छन्नाकृतये
झिल्लेश्वराय झकारेशाय झञाङ्गुलिकराय अम्बुजाय झञाक्षरा-
श्चिताय झङ्काराय टिटिभासनसंस्थिताय टङ्काराय टङ्कधारिणे
ठःस्वरूपाय ठधाधिपाय डामरवे डुमरवे डिङ्गाय डामरीशाय
डाकिनीसेविताय डाढ्याय डढगुल्फाङ्गुलिप्रभाय वेशप्रियाय
णवलेशाय णकारपदपङ्कजाय ताराधिपेश्वराय तथ्याय तन्त्री-
वादनतत्पराय त्रिपुरीशाय त्रिनेत्रेशाय त्रयीतनवे अधोक्षजाय
तामसाय तामसप्रेष्ठाय तमोहर्त्रे तमःकर्त्रे तन्त्राकर्त्रे तमोरूपाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तपसःफलदायकाँयं तज्ज्ञादिक्लनाय कान्ताय तकाराक्षरभूपगाय स्थाणवे स्थूलस्थिताय नित्यस्थविराय स्थण्डिलाय स्थूलाय थकारजानवे अध्यात्मँने देवनायकाय दुर्जयाय दुःखघ्ने दात्रे दरिद्रच्छेदनाय धामिने दौर्भाग्यहर्त्रे देवेन्द्राय द्वादशमुखाय अब्जमध्यगाँय द्वादशान्तकवचमते दूराय दुरतिक्रमाय दुर्ज्ञेयाय दुष्टवंशघ्नाय दयानाथाय दयाकुलाय दामोदराय दीधितिमते दकाराक्षरमातृकाँयं धर्मबन्धवे धर्मनिधये धर्मराजाय धनप्रदाय धनदेष्टाय धनाध्यक्षाय धरादर्शनाय धुरन्धराय धूर्जटिने क्षणवाँसिने धर्मक्षेत्राय धराधिपाय धराधाराय धुरीणाय धर्मात्मजाय धर्मवत्सलाय धराभृद्वल्लभाय धर्मिणे धकाराक्षरभूषणाय "तेजोसि" ॐनर्मप्रियायस्वाँहा ॥ ध्यानं ॥ ॐनन्दिरुद्रायस्वाहा नेत्रे नीतिप्रदाय नलिनाय नलिनीवल्लभाय तुन्नाय नाट्यकृते नाट्यवर्धनाय नरनाथाय नृपस्तुत्याँयं नभोगामिने नभःप्रियाय नभोनन्ताय नमितारातये नरनारायणाय नारायणाय नीलरुचे नम्राङ्गाय नीललोहिताय नादरूँपिणे नादमयाय नादविन्दुस्वरूपकाय नाथाय नागपतये नागाय नागराजाश्रिताय नाकस्थिताय अनेकवपुषे नकाराक्षरमातृकाय पद्माशयाँयं परस्मैज्योतिषे पीवरास्याय पटेश्वराय प्रीतिप्रियाय प्रेमकराय प्रणतार्तिभयापहाय परित्रात्रे परंध्वंसिने परारये पुरसंस्थिताँयं पूर्णानन्दमयाय पूर्णतेजसे पूर्णेश्वरेश्वराय पाटलवर्णाय पटिम्ने पाटलेशाय परात्मवते परमेशवपुषे प्रांशवे प्रमत्ताँयं प्रणतेष्टदाय अपारपारदाय पीनाय पीताम्बरप्रियाय पावकाय पचनाय पिचुलाय पुष्टाय प्रेमदाय जनसौख्यदाँयं

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रमोदिने प्रतिपक्षघ्नाय पकाराक्षरमातृकाय फलाय भोगापवर्गसुफलिनीशाय फलात्मकाय फुल्लदम्भोजमध्यस्थाय फुल्लदम्भोजधाराय स्फुटद्युतये स्फुटाकाराय स्फुटिकाचलचारकाय स्फूर्जत्किरणमालिने फकाराक्षरपार्श्वकाय बालाय बालप्रियाय वान्ताय वालध्वान्तहराय बलिने बलादये वर्बरध्वंसिने वर्बरामृतपानकाय बुधाय बृहस्पतये वृक्षाय बृहदश्वाय बृहद्गतये बृहत्पृष्ठाय भीमरूपाय भयापहाय भिदुरप्रियाय भर्गाय भृगवे भृगुस्थायिने भार्गवाय कवये शेखराय भाग्यदाय भानवे दीप्ताङ्गाय "तेजोसि" ॐभनाभयेस्वाहां ॥ ध्यानं ॥ ॐ स्वाहाभमातृकाय महाकालाय महाध्यक्षाय महानादाय महामतये महोज्ज्वलाय मनोहारिणे मनोगामिने मनोभवाय मानदाय मल्लघ्ने मल्लाय मेरुमन्दिरमन्दाराय मन्दारमालाभरणाय माननीयाय मनोभयाय मोदिताय सवित्रे मार्तण्डाय मुण्डमण्डिताय महावराहाय मीनेशाय मेषगाय मिथुनेष्टदाय मदालसाय अमरस्तुत्याय सुरारये वरदाय माधवाय मेदिनीशाय मधुकैटभनाशनाय माल्यवते मेधनाय माराय मेधाविने मुसलायुधाय मुकुन्दाय मुरारिघ्ने सराशिफलदाय मदाय मदनाय मोदकाहाराय मकाराक्षरमातृकाय यज्वने यज्ञेश्वराय यन्ताय योगिनांहृदयस्थिताय यात्रिकाय यज्ञफलदाय यज्ञिने यमलनायकाय योगनिद्राप्रियाय योगकारणाय योगवत्सलाय यष्टिधारिणे यन्त्रेशाय व्योममण्डलमध्यगाय युयुत्सवे जयदाय योगाय योगधर्मानुवर्तकाय योगिनीचक्रमध्यगाय योगीश्वरपूजिताय यान्ताय यक्षैकतिलकाय यक्षराक्षसभूषणाय रामाय रमणशीलाय रत्नभानवे रुरु-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रियायँ रत्नमौलये रत्नतुङ्गाय रत्नपीठान्तरस्थाय रत्नांशुमाल्याय रत्नाढ्याय रत्नकङ्कणनूपुराढ्याय रत्नाङ्गदलसद्बाहवे रत्नपादुकमण्डिताय रोहिण्याश्रयाय रक्षाकरायँ रात्रिज्वरान्तकाय रकाराक्षररूपाय लज्जाबीजाश्रिताय लवाय लक्ष्मीभानवे लतावासिने लसत्कान्तये लोकभृते लोकातङ्कहराय लासावल्लभायँ लोमशाय अलिगाय लिङ्गेश्वराय लिङ्गनादाय लीलाकारिणे ललम्भसाय लक्ष्मीवते लोकविध्वंसिने लकाराक्षरभूषणाय "तेजोऽसि" ॐवामनाय स्वाँहाँ ॥ ध्यानं ॥ वीरवीरेन्द्राय वाचालाय वाक्पतिप्रियाय वाचामगोचराय वार्ताय वीणायै वेणुधराय वराय वाग्भवाय वालिशध्वंसिने विद्यानकाय कनकाय वकारमातृकामौलये शाम्भवेष्टप्रदाय शुकाय शशिने शोभकराय शान्ताय शान्तिकृते शमनप्रियायँ शुभङ्कराय शुक्लवस्त्राय श्रीपतये श्रीयुताय श्रुताय श्रुतगम्याय शरद्बीजमण्डिताय शिष्टसेविताय शिष्टाचाराय शुभाचारायँ शेषाय शेवालताडनाय शिपिविष्टाय शिवाय शुक्लाय सेव्याय शाक्षरमातृकाय षडाननाय षङ्कारकाय षोडशसुरभूषितायँ षट्पदस्वनतोषिणे षडाम्नायप्रवर्तकाय षड्रसास्वादसन्तुष्टाय षकाराक्षरमातृकाय सूर्यविन्दवे सुखाकराय समस्तसाधकेशाय समस्तकुलशेखराय सुरसूर्याय स्वधासूर्यायँ स्वसूर्याय साक्षरेशाय हरित्सूर्याय हरिद्भानवे हव्यैकभुजे हव्यवाहनाय हालासूर्याय सोमसूर्याय हुतसूर्याय हरिसूर्यायँ ह्रांसूर्यबीजाय ह्रींसूर्याय हकाराक्षरमातृकाय लंबीजमण्डिताय सूर्याय क्षोणीसूर्याय क्षमापतये क्षुत्सूर्याय क्षान्तसूर्याय लक्ष्यसूर्यायँ सदाशिवाय अकार-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

सूर्याय क्षःसूर्याय सर्वसूर्याय कृपानिधये भूःसूर्याय भुवःसूर्याय स्वःसूर्याय सूर्यनायकाय ग्रहसूर्यायँ ऋक्षसूर्याय लग्नसूर्याय महेश्वराय राशिसूर्याय योगसूर्याय मन्त्रसूर्याय अनुत्तमाय तत्वसूर्याय परासूर्याय विष्णुसूर्यायँ प्रतापवते रुद्रसूयार्य ब्रह्मसूर्याय वीरसूर्याय वरोत्तमाय धर्मसूर्याय कर्मसूर्याय विश्वसूर्याय विनायकाय त्रिलोचनाय "तेजोसि" ॐभुक्तिमुक्तिलक्ष्मीसुखदायस्वाहा १००० इति सूर्यसहस्रनामावली समाप्ता ॥

अथ शिवसहस्रनामावली:।

ॐउपमन्युरुवाच ॥ यतो लोकाः सम्भवन्ति न भवन्ति यतः पुनः। सर्वभूतात्मभूतस्य हरस्यामिततेजसः। अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु। यच्छ्रुत्वा मनुजश्रेष्ठः सर्वान्कामानवाप्स्यति ॥ अस्य श्रीशिवसहस्रनामस्तवराजस्य तुण्डिर्ऋषिः, अनुष्टुप्च्छन्दः, श्रीशिवःपरमात्मादेवता आत्मनो० होमे विनियोगः ॥ ॐहृद,-न-शिर,-मः-शिखा,-शि-कव,-वा-नेत्र, य-अस्त्रायफट्। ॐअङ्गुनतर्ज-,मः मध्य, शिअना,-वाकनि,-यकरत॥ प्राणायामः। ध्यानं, देवं सदा कलशसोमकरं त्रिनेत्रं पद्मासनं च वरदाभयदं सुशुभ्रम्। शङ्खाभयाब्जवरभूषितया च देव्या वामेङ्कितं शमनभङ्गहरं नमामि ॥ तत्पुरुषाय वि ३ ॥ ॐस्थिरायस्वाहा स्थाणवे प्रभवे भानवे प्रभवाय वरदाय वराय सर्वात्मने सर्वविख्याताय सँर्वस्मै सर्वाकरोद्भवाय जटिने चर्मिणे शिखण्डिने सर्वाङ्गाय सर्वभावनाय हराय हरिणाक्षाय सर्वभूतहराय विभवे प्रवृत्तये[२०] निवृत्तये नियताय शाश्वताय ध्रुवाय श्मशानचारिणे भगवते खचराय गोचरोद्भवाय अभिवाद्याय महाँक-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

र्मणे तपस्विने भूतभावनाय उन्मत्तवेशप्रच्छन्नाय सर्वलोक-
पितामहाय महारूपाय महाकायाय वृषरूपाय महायशसे महा-
त्मने सर्वभूतात्मने[४०] विश्वरूपाय महाहनवे लोकपालाय अन्त-
र्हितात्मने प्रसादाय हयगर्दभये पवित्राय महते नियमाय
नियमाश्रयाय[५०] सर्वकर्मणे स्वयम्भूताय आदये आदिकराय
निधये सहस्राक्षाय विशालाक्षाय सोमाय नक्षत्रसाधकाय
चन्द्राय[६०] सूर्याय शनये केतवे ग्रहाय ग्रहपतये वराय अत्रये
अत्र्यानमस्कर्त्रे मृगबाणार्पणाय अनघाय[७०] महातपसे घोरतपसे
अदीनाय दीनसाधकाय संवत्सरकराय मन्त्रिणे प्रमाणाय पर-
मंतपसे योगिने याज्याय[८०] महाबीजाय महारेतसे महाबलाय
स्वर्णरेतसे सर्वज्ञाय सुबीजाय बीजवाहनाय दशबाहवे अनि-
मिषाय नीलकण्ठाय[९०] उमापतये विश्वरूपाय स्वयंश्रेष्ठाय बलवी-
राय अबलाय गणाय गणकर्त्रे गणपतये दिग्वाससे "तेजोसि"
ॐकामायस्वाहा[५००] ॥ ध्यानं ॥ ॐमन्त्रविदेस्वाहा परमाय मन्त्राय
सर्वभावकराय हराय कमण्डलुधराय धन्विने बाणहस्ताय क-
पालवते अशनिने शतघ्निने[१०] खड्गिने पट्टिसिने आयुधिने बृहते
स्रुवहस्ताय स्वरूपाय तेजसे तेजस्कराय निधये उष्णीषिणे[२०]
सुवक्त्राय उदग्राय विनताय दीर्घाय हरिनेत्राय सुतीक्ष्णाय
कृष्णाय सृगालरूपाय सिद्धार्थाय मुण्डाय[३०] सर्वशुभङ्कराय
अजाय बहुरूपाय गन्धधारिणे कपर्दिने ऊर्ध्वरेतसे ऊर्ध्वलि-
ङ्गाय ऊर्ध्वशायिने नभस्तलाय त्रिजटिने[४०] चीरवाससे रुद्राय
सेनापतये खगाय अहश्चराय नक्तञ्चराय तिग्ममन्यवे सुवर्चसाय
गजघ्ने दैत्यघ्ने[५०] कालाय लोकधात्रे गुणाकराय सिंहशार्दूलरूपाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

आर्द्रचर्माम्बरावृताय कालयोगिने महानादाय सर्वकामाय चतुष्पथाय निशाचराय[६०] प्रेतचारिणे भूतचारिणे महेश्वराय बहुरूपाय बहुधराय स्वर्भानवे अमिताय गतये नृत्यप्रियाय नृत्यतृप्ताय[७०] नर्तकाय सर्वलासकाय घोराय महातपसे पाशाय नित्याय गिरिरुहाय नभसे सहस्रहस्ताय विजयाय[८०] व्यवसायाय अतन्द्रिताय अमर्षणाय धर्षणात्मने यज्ञघ्ने कामनाशकाय दक्षयज्ञापहारिणे स्ववर्णाय मध्यमाय तेजोपहारिणे[९०] बलिघ्ने मुदिताय अर्थाय अजिताय अवराय गम्भीरघोषाय गम्भीराय गम्भीरबलवाहनाय न्यग्रोधरूपाय "तेजोसि" ॐन्यग्रोधायस्वाहा[१००] ॥ ध्यानं ॥ ॐवृक्षकर्णस्थितयेस्वाहा स्वभुवे सुतीक्ष्णदशनाय महाकायाय महाननाय विष्वक्सेनाय हरये यज्ञाय संयुगापीडवाहनाय तीक्ष्णतपसे[१०] हर्यश्वाय सहायाय कर्मकालविदे विष्णुप्रसादिताय यज्वने समुद्राय वडवामुखाय हुताशनसहायाय प्रशान्तात्मने हुताशनाय[२०] उग्रतेजसे महातेजसे जयाय विजयाय कालविदे ज्योतिषामयनाय सिद्धये सर्वविग्रहाय शिखिने मुण्डिने[३०] जटिने ज्वालिने मूर्तिजाय दुर्बलाय बलिने वैणविने पणविने तालिने खलिने कालकटंकटाय[४०] नक्षत्रविग्रहमतये गुणबुद्धिलयाय अगमाय प्रजापतये विश्वबाहवे विभागाय सर्वतोमुखाय विमोचनाय सर्वगणाय हिरण्यकवचोद्भवाय[५०] मेढ्जाय बलचारिणे महीचारिणे स्रुताय सर्वतूर्यनिनादिने सर्वतोद्यपरिग्रहाय व्यालरूपाय गुहावासिने हंसमालिने तुरङ्गविदे[६०] त्रिदशाय त्रिपदीभूमये सर्वबन्धविमोचकाय असुरेन्द्राणांबन्धनाय युधिशत्रुविनाशनाय सांख्यप्रसादाय दुर्वाससे सर्वसाधुनिषेविताय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रस्कन्दनाय विभागज्ञायँ अतुल्याय यज्ञभागविदे सर्वावासाय सर्वचारिणे सुवाससे वासवोपमाय हैमाय हेमकराय अज्ञाय सर्वाधारिणे धरोत्तमाय लोहिताक्षाय महाक्षाय विजयाक्षाय विशारदाय सङ्ग्रहाय निग्रहाय कर्त्रे मृगचर्मनिवासनाय मुख्यायँ मुकुन्ददेहाय काहलये सर्वकामदाय सर्वकामप्रसादाय सुबलाय बलरूपधृषे सर्वकामवराय वरदाय सर्वतोमुखाय "तेजोसि" ॐआकाशनिर्विरूपायस्वाहा ॥ ध्यानं ॥ ॐनिपातिनेस्वाहा अवशाय खमुवे रौद्ररूपाय अंशुभ्यः आदित्याय बहुरश्मये स्ववर्चसिने वसुवेगाय महावेगायँ मनोवेगाय निशाचराय सर्ववासिने श्रियोवासिने उपदेशकराय हरये मुनये आत्मने निरालोकाय सम्भग्नायँ सहस्रदाय पक्षिणे पक्षिरूपाय अतिदीप्ताय विशांपतये उन्मादाय मदनाय कामाय अश्वत्थाय अर्थकरायँ यशसे वामदेवाय वामाय प्राग्दक्षिणाय वामनाय सिद्धयोगिने महर्षये सिद्धार्थाय सिद्धसाधकाय भिक्षवे भिक्षुरूपाय विपणाय मृदवे अक्षयाय महासेनाय विशाखाय षष्टिभागाय गवाम्पतये वज्रहस्ताय प्रतिस्तंम्भिने सैन्यस्तम्भनाय गीतनृत्यकराय तालाय मधवे मधुकलोचनाय वाचस्पत्याय वाजसनाय नित्यमाश्रमपूजिताय ब्रह्मचारिणे लोकचारिणे सर्वचारिणे विचारविदे ईशानाय ईश्वराय कालाय निशाचारिणे पिनाकधृषे–निमित्तस्थाय निमित्ताय शम्भवे नन्दिकराय हरये नन्दीश्वराय नन्दिने नन्दनाय नन्दिवर्धनाय भगहारिणे निहन्त्रे कालाय ब्रह्मविदांवरायँ चतुर्मुखाय महालिङ्गाय चारुलिङ्गाय लिङ्गाध्यक्षाय सुराध्यक्षाय लोकाध्यक्षाय युगावहाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

बीजाध्यक्षाय बीजकर्त्रे ३०अध्यात्मानुगतये बलाय इतिहासकराय कल्पाय गौतमाय निशाकराय दम्भाय अदम्भाय वैदम्भाय वश्याय "तेजोसि" ॐवश्यकरायस्वाहा ॥ ध्यानं ॥ ॐकलयेस्वाहा लोककर्त्रे पशुपतये महाकर्त्रे अनौषधाय परमाक्षरमूर्तये बलवते शक्राय नीत्यै १०अनीत्यै शुद्धात्मने शुद्धमानाय मनोगतये बहुप्रसादाय सुस्वप्नाय धर्षणाय अमित्रजिते वेदकाराय मन्त्रकाराय २०विदुषे समरमर्दनाय महामेघनिवासिने महाघोराय वशीकराय अग्निज्वालिने महाज्वालिने हुतिधूम्राय हुताय हविषे ३०वृषणाय शङ्कराय नित्यंवर्चस्विने धूमकेतनाय नीलाय सर्वाङ्गलुब्धाय शोभनाय निरवग्रहाय स्वस्तिदाय स्वस्तिभोगाय भागिने४० भागकराय लघवे उत्सङ्गाय महाङ्गाय महागर्भपरायणाय कृष्णवर्णाय सुवर्णाय सर्वदेहिनामिन्द्रियाय महापादाय महाहस्ताय५० महाकायाय महायशसे महामूर्ध्ने महामात्राय महानेत्राय महालयाय महादन्ताय महाकर्णाय महामेढ्राय महाहनवे६० महासेनाय महाकम्बवे महाग्रीवाय श्मशानधृते महावक्षसे महोरस्काय अन्तरात्मने मृगालयाय महाकोटये महान्तकाय७० महोष्ठाय महानासाय लम्बनाय लम्बितौष्ठाय महामायाय पयोनिधये महाङ्गाय महादंष्ट्राय महाजिह्वाय महामुखाय८० महानखाय महारोम्णे महाकेशाय महाजटाय असपत्नाय प्रसादाय प्रत्ययाय गिरिसादनाय स्नेहनाय अस्नेहनाय९० अजिताय महामुनये वृक्षाकाराय वृक्षहेतवे अनलाय वायुवाहनाय मण्डलिने मेरुधाम्ने वेदवेदाङ्गदर्पणे "तेजोसि" ॐअथर्वशीर्णेस्वाहा१०० ॥ ध्यानं ॥ ॐसामास्यायस्वाहा ऋक्सहस्रामितेक्षणाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

यजुःपादभुजाय गुह्याय प्रकाशाय जङ्गमाय अमोघार्थाय अ-
भिगम्याय सुदर्शनाय उपहारप्रियायँ सर्वकनकाय काञ्चन-
च्छवये नन्दिने नन्दिकराय भव्याय पुष्करस्थाय वृषस्थिराय
द्वापरत्रासनाय आद्याय यज्ञायँ यज्ञसमाहिताय नक्तञ्चराय
कालाय मकराय कालपूजिताय सुगणाय गणकार्याय भूतवा-
हनसारथये भस्मशायिने भस्मँगोप्त्रे भस्मरूपाय तरवे गणाय
लोकपालाय अलोकाय महात्मने सर्वपूजिताय शुक्लाय त्रिशु-
क्लाय सम्पन्नायँ शुचये भूतनिषेविताय आश्रमस्थाय कपोत-
स्थाय विश्वकर्मपतये वराय विशालशाखाय ताम्रौष्ठाय अम्बु-
जाक्षाय सुनिश्चलायँ कपिलाय कपिलकेशाय आयुषे परात्प-
राय गन्धर्वाय अदितये तार्क्ष्याय सुविज्ञेयाय सुशारदाय पर-
श्वधायुधायँ देवाय अर्थकारिणे सुबान्धवाय तुम्बवीणाय
महाकोपाय ऊर्ध्वरेतसे जलेशयाय उग्रवंशकराय वंशाय वंश-
नादायँ अनिन्दिताय सर्वाङ्गरूपिणे मायाविने सुहृदाय अनि-
लाय अनलाय बन्धनाय बन्धकर्त्रे सुबन्धनविमोचनाय सय-
ज्ञारँये सकामारये महादंष्ट्रोद्धृतरिपवे बहुधानिन्दिताय सर्वाय
शंकराय शम्बराय अधनाय अमरेशाय महादेवाय विश्वरूपायँ
सुरारिघ्ने अहिर्बुध्न्याय अनिलाभाय चिकितानाय हविषे अजै-
कपादे कापालिने त्रिशंकुवे अजिताय "तेजोसि" ॐशिवाय-
स्वाँहाँ ॥ ध्यानं ॥ ॐधान्वन्तरयेस्वाहा धूमकेतवे स्कन्दाय वैश्र-
वणोपमाय धात्रे शक्राय विष्णवे मित्राय त्वष्ट्रे ध्रुवायँ वसवे
प्रभावाय सर्वगाय वायवे अर्यम्णे सवित्रे रवये उषङ्गाय
विधात्रे सन्धात्रे भूतभावनाय अतितीक्ष्णाय हराय वाग्मिने

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

सर्वकामगुणावहाय पञ्चवक्त्राय महावक्त्राय चन्द्रवक्त्राय मनोरमाय बलवते ॐ उपशान्ताय पुराणाय पुण्यचञ्चवे कुरुकर्त्रे कुलावासिने कुरुभूताय गुणौषधाय सर्वाशयाय दॅर्भशायिने सर्वेषांप्राणिनांपतये देवदेवाय सुखासक्ताय सदसते सर्वरत्नविदे कैलासशिखरावासिने हिमवद्गिरिसंश्रयाय कुलहारिणे कुलकर्त्रे बहुविद्यायँ बहुप्रदाय वाणिज्याय वर्धकिने वृक्षाय वकुलाय चन्दनच्छदाय सारग्रीवाय महाजत्रवे अलोलाय महौषधँये सिद्धार्थकारिणे सिद्धार्थाय छन्दोव्याकरणान्तगाय सिंहनादाय सिंहदंष्ट्राय सिंहगाय सिंहवाहनाय प्रभावात्मने जगत्कालाय तॉलिने लोकहिताय तरवे सारङ्गाय नवचक्राङ्गाय केतुमालिने सुभावनाय भूतालयाय भूतपतये अहोरात्रमनिन्दिताय, सर्वभूतानांवँहित्रे, सर्वभूतानांनिलयाय, करस्रुवे भवाय अमोघाय संयुताय अश्वाय, भोजनाय, प्राणधारणाय, धृतिमते मतिमँते दक्षाय सत्कृताय युगाधिपाय गोपालाय गोपतये ग्रामाय गोचर्मवसनाय हरये हिरण्यबाहवे "तेजोसि" ॐगुहापालायस्वाँहा । ध्यानं ॥ ॐप्रवेशिनांत्रात्रेस्वाहा, प्रकृष्टारये, महाहर्षाय, जितकामाय जितेन्द्रियाय गान्धाराय सुवाससे तपसे कर्मरतये नराय महागीताय महानृत्याय अप्सरोगणसेविताय महाकेतवे धनुषे धातवे नैकसानुचराय चलाय आवेदनीयाय आदेशायँ सर्वगन्धसुखावहाय तोरणाय तारणाय वाताय परिधिपतये खेचराय संयोगवर्धनाय वृद्धाय महावृद्धाय गुणाधिपायँ नित्यंधर्मसहायाय देवासुरपतये रतये युक्ताय युक्तबाहवे त्रिदशाय सुपर्वणाय

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

आषाढाय सुषाढाय ध्रुवाय[४०] हरिणाय हराय वपुषे आवर्तनाय नित्याय वसुश्रेष्ठाय महारथाय शिरोहारिणे विमर्षिणे सर्वलक्षणलक्षिताय[५०] अक्षराय क्षराय योगिने सर्वयोगिने महाबलाय समाम्नायाय असमाम्नायाय तीर्थदेवाय महाद्युतये निर्जीवाय[६०] जीवनाय मन्त्राय अनिन्दिताय बहुकर्कशाय रत्नप्रभूताय रक्ताङ्गाय महार्णवनिनादभृते मूलाय विशालाय अमृताय[७०] व्यक्ताव्यक्ताय तपोनिधये आरोहणाय अधिरोहाय शीलधारिणे महातपसे सेनाकल्पाय महाकल्पाय योगाय युगकराय[८०] गतये युगरूपाय महारूपाय पवनाय गहनाय अवधाय न्यायनिर्वापणाय पादाय पण्डिताय अचलोपमाय[९०] बहुमालाय महामालाय सुमालाय बहुलोचनाय विस्ताराय लवणाय क्रूराय कुसुमाय सुफलोदयाय "तेजोसि" ॐवृषभायस्वाहा ॥ ध्यानं ॥ ॐवृषभाङ्गायस्वाहा, मणिविद्धाय जटाधराय इन्द्राय विसर्गाय सुमुखाय शराय सर्वायुधाय सहसे निवेदनाय[१०] सुधन्वने सुगन्धाढ्याय महाधनुषे गन्धमालिने भाग्यवते सर्वकर्मणामुत्थानाय मन्थानाय बहुलाय बाहवे सकलाय[२०] सर्वलोचनाय नराय तालाय करस्थालिने ऊर्ध्वसंहननाय वहाय वृत्रपतये सुविख्याताय लोकाय सर्वाश्रयाय[३०] क्रमाय मुण्डाय विरूपाय विकृताय दण्डिने कुण्डिने विकुर्वाणाय हर्यक्षाय ककुभाय वज्रिणे[४०] शतजिह्वाय सहस्रपादे, सहस्रमूर्ध्ने देवेन्द्राय सर्वभूतमयाय गुरवे सहस्रबाहवे सर्वाङ्गाय शरण्याय सर्वलोककृते[५०] विपन्नाशाय मधवे मन्त्राय कनिष्ठाय कृष्णपिङ्गलाय ब्रह्मदण्डविनिर्मात्रे शतघ्नीशतपाशभृते पद्मगर्भाय महागर्भाय ब्रह्मगर्भाय[६०] जलोद्भवाय गभस्तिने ब्रह्मकृते ब्रह्मणे ब्रह्मविदे ब्राह्मणाय गतये अनन्तरूपाय अनेका-

१७

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

त्मने तिग्मांशवे ७० आत्मसम्भवाय ऊर्ध्वगात्मने पशुपतये वातरंहसे मनोजवाय चन्दनाय पद्ममालाग्र्याय अगण्याय अन्तरंगाय अन्तर्यायैं कर्णिकारमहास्रग्विणे नीलमौलये पिनाकधृगे उमापतये उमाकान्ताय जाह्नवीभृते अनम्बराय वराय वराहाय वरदायैं वरेशाय सुमहास्तनाय महाप्रसादाय दमनाय शत्रुघ्ने श्वेतपिङ्गलाय प्रीतात्मने परमात्मने प्रयतात्मने "तेजोसि" ॐप्रधानभृतेस्वाँहां ॥ ध्यानं ॥ ॐसर्वपार्श्वसुतायस्वाहा, तार्क्षाय धर्मसाधारणाय अचलाय चराचरात्मने सूक्ष्माय अमृताय गोवृषेश्वराय साध्यर्षये कृपये ८० आदित्याय विवस्वते सवित्रे अमृताय व्यासाय सर्वस्वसंक्षेपाय सर्वस्वविस्ताराय पर्ययाय अनराय ऋतुभ्यः संवत्सराय मासेभ्यः पक्षाभ्यां सांख्यसमापनाय कलाभ्यः काष्ठाभ्यः लवेभ्यः मात्राभ्यः मुहूर्ताय अह्ने ३० क्षणदायै क्षणेभ्यः विश्वक्षेत्राय प्रजावीजाय लिङ्गाय आद्याय निर्गमाय सते असते व्यक्तायैं अव्यक्ताय पित्रे मात्रे पितामहाय स्वर्गद्वाराय प्रजाद्वाराय मोक्षद्वाराय त्रिविष्टपाय निर्वाणाय ह्लादनायैं ब्रह्मलोकाय परागतये देवासुरविनिर्मात्रे देवासुरपरायणाय देवासुरगुरवे देवाय देवासुरनमस्कृताय देवासुरमहामात्राय देवासुरमहाश्रयाय देवासुरमहाध्यक्षायैं देवासुरगणाग्रण्ये देवातिदेवाय देवर्षये देवासुरसुपूजिताय देवासुरेश्वराय विश्वस्मै देवासुरमहेश्वराय सर्वदेवमयाय अचिन्त्याय देवात्मने ७० अर्थसाधकाय उद्भिदे त्रिविक्रमाय वैद्याय विरजसे विरजोम्बराय ईड्याय हस्तीश्वराय व्याघ्राय देवसिंहायैं नरर्षभाय विबुधाग्रचरश्रेष्ठाय सर्वदेवोत्तमोत्तमाय गुहाकान्ताय अतिनिसर्गाय स्वनाम्नासर्वपावनाय शृङ्गिणे शृङ्गिप्रियाय बभ्रवे

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

राजराजातिपूजिताय अभिरामाय सुरगणातिरामाय सर्वसा-
धनाय ललाटाक्षाय विश्वदेवाय सर्वाधिब्रह्मवर्चस्विने स्थाव-
राणांपतये नियतेन्द्रियवर्धनाय सिद्धार्थाय सर्वभूतार्थाय
नियतव्रतसंस्थिताय व्रतादये परंब्रह्मणे भक्तानांपरमागतये सु-
शान्तदीप्ततेजस्विने श्रीमते श्रीवर्धनाय ॥"तेजोसि"। ॐजगते-
स्वाहा ॥ उपमन्युरुवाच। अष्टोत्तर-सहस्रेण जप्यमानस्य शङ्करः।
यथाभीष्टं ददात्याशु प्रयतस्य न संशयः ॥ इति महाभारते
शान्तिपर्वणि शिवसहस्रनामस्तुतिः ॥

अथ नरकोत्तारणस्तोत्रम् ॥

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं
व्यासं ततो जयमुदीरयेत् ॥ नारायणं जगद्बीजं पुराणं पुरुषो-
त्तमम्। परिपृच्छति धर्मात्मा पाण्डुपुत्रो युधिष्ठिरः ॥ श्रीयुधि-
ष्ठिर उवाच ॥ किं जपन्पुरुषो मुच्येद्यमलोकैकशासनात्। तन्मे
कथय तत्त्वेन भक्तस्य तव केशव ॥ श्रीभगवानुवाच ॥ शृणु
राजन्महाबाहो धर्मात्मन्पाण्डुनन्दन। अहं ते कथयिष्यामि
नरकोत्तारणं महत् ॥ ॐकारात्मन्नमस्तेऽस्तु ऋग्यजुःसाम-
रूपिणे। यज्ञात्मने नमस्तेस्तु सर्वशास्त्रात्मने नमः ॥ भूतभव्य-
जगन्नाथ सर्वभूत जगत्पते। नमस्ते सर्वलोकेश महापुरुष पूर्वज।
नमोमत्स्याय कूर्माय मूलप्रकृतये नमः। नमो यज्ञवराहाय नर-
सिंहाय वै नमः। त्रिविक्रमाय रामाय वैकुण्ठाय नराय च।
नमस्तेऽश्वमुखायापि कूटस्थायाक्षराय च। अनन्तायाच्युतायापि
जामदग्न्याय वै नमः। मधुकैटभनाशाय शङ्कराय नमोनमः।
रामाय विश्वरूपाय वासुदेवाय वै नमः। पीताम्बराय देवाय
युगवर्णाय वै नमः ॥ स्थित्युत्पत्तिविनाशानां हेतुरूपाय वै

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

नमः । ब्रह्मणे वायुरूपाय रुद्ररूपाय वै नमः । धनदेशस्वरूपाय मोक्षरूपाय वै नमः । सोमाय सूर्यरूपाय हविर्गन्धाय वै नमः । परमेश्वररूपाय नमः श्रीवत्सधारिणे । बिभ्रत्सरस्वतीं वक्त्रे सर्वज्ञोसि नमोस्तु ते । लक्ष्मीप्रियाय देवाय ह्यतसीश्यामरूपिणे । प्रसीद मम दीनस्य भक्तियुक्तस्य माधव ॥ रौरवान्नरकाद्घोरात्पाहि मां गरुडध्वज । असिपत्रवनात्पाहि शङ्खचक्रगदाधर । कुम्भीपाकान्महादेव पाहि मां शरणागतम् । अवीचेः कालसूत्राच्च पाहि मां दुःखनाशन । सूच्यागाराद्म्बरीषात्पाहि मां मधुसूदन । असृक्केशास्थिवाहिन्या वैतरण्याश्चतुर्भुज । पाहि मां कर्मसाक्षी त्वं शरणागतवत्सल । इक्षुपीडनकैर्यन्त्रैः पीड्यन्ते यत्र मानवाः । देशात्तस्माज्जगन्नाथ पाहि मां भक्तवत्सल । तप्तवालुकदेशश्च शल्मल्यायामवल्लितः । तद्देशात्पुण्डरीकाक्ष पाहि मां करुणानिधे । क्रकचैर्यत्र पाट्यन्ते मानुषा देवदारुवत् । तेभ्योपि रक्ष मां हंस शरणागतवत्सल । सारमेयैश्च खाद्यन्ते यामे वर्त्मनि मानवाः । महाभयात्प्रभो तस्मात्केशव क्लेशनाशन । अन्ये च नरका घोरा यमलोके प्रतिष्ठिताः । तेभ्योपि रक्ष मां हंस नमस्तेऽस्तु सहस्रशः । तिर्यग्योनिगतस्यापि भक्तिर्मे तव केशव । अचला स्याद्यथा कृष्ण तथा कुरु वरप्रद । बहुबाहूरुपादस्त्वं बहुकर्णाक्षिशीर्षवान् । सर्वतो रक्ष मां हंस सर्वात्मन् सर्वतोमुख । नमस्ते देवदेवेश यथा पास्यऽखिलं जगत् । स्थितौ तथा समस्तेभ्यो दोषेभ्यो मां समुद्धर । कृष्णाच्युतहृषीकेश सर्वभूतेश केशव । महात्मन् पाहि मां भक्तं वासुदेव नमोस्तुते । इति स्तवन्नरो राजन्सदा नारायणं प्रभुम् । यमलोकं न पश्येच्च नरकं च कुतः पुनः । स्मरन्नपि सदा मर्त्यः शृण्वन्नपि

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

युधिष्ठिर। महापातकजैर्घोरैर्मुच्यते सर्वकिल्विषैः। आयुरारोग्यमैश्वर्यं श्रियं मेधां तथा बलम्। प्राप्नोति च पठन्नित्यं तद्विष्णोः परमं पदम्। भयकान्तारदुर्गेषु तथा संसारसागरात्। सत्यं संतरते मर्त्यः स्तवस्याप्यनुकीर्तनात्। अन्ते सायुज्यमाप्नोति तद्विष्णोः परमं पदम्॥ इति श्रीनरकोत्तारणस्तोत्रं सम्पूर्णम्॥

अथ नारायणकवचम्॥

श्रीराजोवाच॥ यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान्। क्रीडन्निव विनिर्जित्य त्रैलोक्या बुभुजे श्रियम्॥ १॥ भगवंस्तत्समाख्याहि वर्म नारायणात्मकम्। यथाऽऽततायिनः शत्रून्येन गुप्तोऽजयन्मृधे॥ २॥ श्रीशुकउवाच॥ वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायाऽनुपृच्छते। नारायणाख्यं वर्माऽह तदिहैकमनाः शृणु॥ ३॥ विश्वरूप उवाच॥ धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः। कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः॥ ४॥ नारायणमयं वर्म संनह्येद्भय आगते। पादयोर्जानुनोरूर्वोरुदरे हृद्यऽथोरसि॥ ५॥ मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत्॥ ॐनमोनारायणायेति विपर्ययमऽथापिवा॥ ६॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया। प्रणवादियकारान्तमऽङ्गुल्यङ्गुष्ठपर्वसु॥ ७॥ न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि। षकारं तु भ्रुवोर्मध्ये णकारं शिखयाऽदिशेत्॥ ८॥ वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु। मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेन्नरः॥ ९॥ सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत्। "ॐविष्णवेनमः" इति॥ १०॥ आत्मानं

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

परमं ध्यायेद्ध्येयं षड्शक्तिभिर्युतम् । विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ११ ॥ ॐअस्यश्रीनारायणकवचमन्त्रस्य, श्रीविश्वरूपऋषिः, गायत्रं छन्दः, श्रीपरमात्मानारायणो देवता, ॐनमोनारायणायेति वीजं, ॐनमो भगवते वासुदेवायेति शक्तिः, ॐविष्णवेनमः इतिकीलकं, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीविष्णुप्रीत्यर्थे पाठे विनियोगः ॥ ॥ विश्वरूपऋषयेनमः शिरसि, गायत्रंच्छन्दसेनमः मुखे, श्रीपरमात्मा नारायणोदेवतायैनमः हृदि, ॐनमोनारायणायेतिवीजायनमः गुह्ये, ॐनमोभगवतेवासुदेवायेतिशक्तये नमः नाभौ, ॐविष्णवेनमइतिकीलकायनमः पादयोः, पाठेविनियोगायनमः सर्वाङ्गेषु ॥ ॐॐनमः पादयोः, ॐननमः जानुनोः, ॐमोनमः ऊर्वोः, ॐनानमः उदरे, ॐरानमः हृदि, ॐयनमः उरसि, ॐणानमः मुखे, ॐयनमः शिरसि ॥ ॐॐनमः दक्षिणहस्ततर्जन्यैनमः, ॐननमः दक्षिणमध्यमायैनमः, ॐमोनमः दक्षिणानामिकायैनमः, ॐभनमः दक्षिणकनिष्ठिकायैनमः, ॐगनमः वामकनिष्ठिकायैनमः, ॐवनमः वामानामिकायैनमः, ॐतेनमः वाममध्यमायैनमः, ॐवानमः वामतर्जन्यैनमः, ॐसुनमः वामाङ्गुष्ठाद्यपर्वणेनमः, ॐदेनमः वामाङ्गुष्ठान्त्यपर्वणेनमः, ॐवानमः दक्षिणाङ्गुष्ठाद्यपर्वणेनमः, ॐयनमः दक्षिणाङ्गुष्ठान्त्यपर्वणेनमः ॥ ॥ ॐॐनमः हृदयायनमः, ॐविनमः शिरसेस्वाहा, ॐषनमः भ्रुवोर्मध्ये, ॐणनमः शिखायैवषट्, ॐवेनमः नेत्राभ्यांवौषट्, ॐननमः सर्वसन्धिषु, ॐमःनमः अस्त्रायफट् दिग्बन्धेविनिर्दिशेत् ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान्कनककुण्डलवा-

१ ईश्वररूपं २ ऐश्वर्यादिभिर्भगशब्दवाचिभिः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

न्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ ॐनमो नारायणाय
पुरुषाय महात्मने । विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २ ॥
ॐहरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दराऽरिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥ १ ॥
जलेषु मा रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥२॥
दुर्गेष्वऽटव्याजिमुखादिषु[3] प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ ३ ॥
रक्षत्वऽसौ माऽध्वनि यज्ञकल्पः[4] स्वदंष्ट्रयोन्नीतधरो[5]वराहः । रामो[6]-
ऽद्रिकूटेष्व[7]ऽथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥४॥
मामुग्रधर्माद्[8]ऽखिलात्प्रमादान्नारायणः पातु नरश्च हासात्[9] । दत्त[10]-
स्त्वऽयोगाद्[11]थ योगनाथः पायाद्गुणेशः कपिलः कर्मब-
न्धात् ॥ ५ ॥ सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि[12]
देवहेलनात् । देवर्षिवर्यः[13] पुरुषान्तरार्चनात्[14] कूर्मो हरिर्मां
निरयादशेषात् ॥ ६ ॥ धान्वन्तरिर्भगवान्पात्वऽपथ्याद्द्वन्द्वाद्भ
याद्दृषभो निर्जितात्मा । यज्ञश्च लोकाद्[15]ऽवताज्जनान्ताद्[16]बलो
गणात्[17]क्रोधवशादहीन्द्रः ॥ ७ ॥ द्वैपायनो भगवानऽप्रबोधाद्बु-

---

३ संग्रामोपक्रमादिषु। ४ यज्ञैरवयवरूपैः कल्प्यन्ते निरूप्यन्ते। ५ उद्धृतभूः। ६ जामदग्न्यः। ७ गिरिशिखरेषु। ८ अभिचारादिलक्षणात्। ९ गर्वात्। १० दत्तात्रेयः। ११ योगभ्रंशात्। १२ पथि यद्देवानां हेलनं नमस्कारादिमकृत्वा गमनं तस्मात्। १३ नारदः। १४ भेदबुद्ध्याऽन्यदेवपूजनात् ॥ पुरुषार्चनान्तरादिति पाठे तु पुरुषार्चनस्यान्तरात् देवपूजाच्छिद्राद्द्वात्रिंशदऽपराधरूपात्। १५ जनापवादात्। १६ जननिमित्तो योऽन्त उपघातस्तस्मात्। बलभद्रः कृतान्तादिति पाठे तु कालात्। १७ क्रोधवशात्सर्पाणां गणात्। शेषनागः।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

धस्तु पाषाण्डगणात्प्रमादात् । कल्किः कलेः कालमला[18]त्प्रपातु
[19]धर्मावनायोरुकृतावतारः ॥ ८ ॥ मां केशवो गदया प्रातरव्या-
द्गोविन्द आसङ्ग[20]वमात्तवेणुः । नारायणः प्राह्ण उदात्तशक्ति-
र्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ ९ ॥ देवोऽपराह्णे मधुहोग्र-
धन्वा सायं त्रिधामा[21]ऽवतु माधवो माम् । दोषे[22] हृषीकेश
उतार्धरात्रे[23] निशान्त एकोऽवतु पद्मनाभः ॥ १० ॥ श्रीवत्स-
धामाऽपररात्र ईशः प्रत्यूषकालेऽसिधरो जनार्दनः । दामोदरो-
ऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ ११ ॥
चक्रं युगा[24]न्तानलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तम् ।
दन्दग्धि[25] दन्दग्ध्यऽरिसैन्यमाऽशु कक्षं यथा वातसखो हुताशः
॥ १२ ॥ गदेऽश[26]निस्पर्शनविस्फुलिङ्गे ! निष्पिण्ढि निष्पिण्ढ्य-
ऽजितप्रियाऽसि । कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्ण-
याऽरीन् ॥ १३ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहै[27]र्घो-
रदृष्टीन् । दरे[28]न्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि
कम्पय ॥ १४ ॥ त्वं तिग्मधारा[29]ऽसिवराऽरिसैन्यमीशप्रयुक्तो

---

१८ कालमलभूतात् । १९ धर्मरक्षणाय महान्कृतोऽवतारो येन । २० अहोरात्र-क्षणानऽभिव्याप्य । २१ ब्रह्मादित्रिमूर्तिः । २२ प्रदोषे । २३ अर्धरात्रपर्यन्ते निशान्ते चैक एव पद्मनाभः । २४ युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सदऽरिसैन्यं । २५ अतिशयेन दहति । तस्यायं स्वभाव एव, नतु प्रार्थनीयमित्यर्थः । २६ अशनिवत्स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्याः सम्बोधनं । हे गदे ! त्वमजितस्य प्रियाऽसि अहमऽच्युतस्य दासः, अतः कूष्माण्डादीन्निष्पिण्ढि २ संचूर्णय २ । सर्वत्र वीप्साऽतिशीघ्रत्वाय । २७ विप्रग्रहा ब्रह्मराक्षसा चान्ये घोरदृष्टयस्तान् । २८ हे पाञ्चजन्य । २९ तिग्मा धारा यस्य । हे तिग्मधार ! खड्गश्रेष्ठ ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मम छिन्दिछिन्धि । चक्षूंषि चर्मन्! शतचन्द्र[३०] छादय द्विषा-
मघोनां[३१] हर पापचक्षुषाम्[३२] ॥ १५ ॥ यन्नो[३३] भयं ग्रहेभ्योऽभूत्के-
तुभ्यो नृभ्य एवच । सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य[३४]
एव वा ॥ १६ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः[३५] ॥ १७ ॥ गरुडो
भगवान् स्तोत्रस्तोभ[३६]च्छन्दोमयः[३७] प्रभुः । रक्षत्वऽशेषकृच्छ्रेभ्यो
विष्वक्सेनः स्वनामभिः ॥१८॥ सर्वापद्भ्यो हरेर्नामरूपयाना-
युधानि नः[३८] । बुद्धीन्द्रियमनःप्राणान्पान्तु पार्षदभूषणाः[३९]
॥ १९ ॥ यथाहि भगवानेव वस्तुतः सदसच्च यत् । सत्येना-
नेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ २० ॥ यथैकात्म्यानु-
भावानां विकल्परहितः स्वयम् । भूषणायुधलिङ्गाख्या धत्ते
शक्तीः स्वमायया ॥ २१ ॥ तेनैव सत्यमानेन[४०] सर्वज्ञो भग-
वान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ २२ ॥
विदिक्षु दिक्षूर्ध्वमधः समन्तादऽन्तर्वहिर्भगवान्नारसिंहः ।
प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः[४१] ॥ २३ ॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम् । विजेष्यस्यऽञ्जसा
येन दंशितोऽसुरयूथपान् ॥ १ ॥ एतद्धारयमाणस्तु यंयं
पश्यति चक्षुषा । पदा वा संस्पृशेत्सद्यः साध्वसात्स विमु-
च्यते ॥ २ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् । राज-

---

३० शतचन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्रचर्मन् । ३१ अघवतां द्विषां । ३२ उग्रदृष्टीनां चक्षूंषि हर । ३३ येभ्यो भयं । ३४ पापेभ्यः । ३५ इष्टविघातकाः । ३६ स्तोत्राणि बृहद्रथन्तरादि सामानि तैः स्तोभ्यते संस्तूयते इतिस्तोत्रस्तोभः ॥ ३७ वेदमूर्तिः । ३८ यथार्थं चेत् । ३९ पार्षदान्भूषयतीति । ४० सत्यभूतेन प्रमाणेन । ४१ ग्रस्तानि समस्तानि दिग्गजविषशस्त्रजलवाय्वऽग्न्यादीनां तेजांसि प्रभावा येन सः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

दस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३ ॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन् द्विजः । योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ४ ॥ तस्योपरि विमानेन गन्धर्वपतिरेकधा । ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ५ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यऽवाक्शिराः । स वालखिल्यवचनादऽस्थीन्याधाय विस्मितः ॥ ६ ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमऽन्वगात् ॥ श्रीशुकः ॥ य इदं शृणुयात्काले यो धारयति चादृतः । तं नमस्यन्ति भूतानि मुच्यते सर्वतोभयात् ॥ ७ ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः । त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ८ ॥

इतिश्रीभागवते षष्ठस्कन्धे नारायणवर्मनामाऽष्टमोऽध्यायः ॥ ॥

अथ पञ्चमुखहनुमत्कवचम्

अथ श्रीपञ्चवदनायाञ्जनेयायनमः । ॐअस्य श्रीपञ्चमुखहनुमत्कवचमन्त्रस्य, ब्रह्माऋषिः, गायत्रं च्छन्दः, पञ्चमुखविराट्हनुमान् देवता, ह्रींबीजं, श्रींशक्तिः क्रौंकीलकं क्रूंकवचं, क्रैं अस्त्रायफट् पाठे विनियोगः ॥ इति दिग्बन्धः ॥ श्रीगरुड उवाच ॥ अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरि । यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥ पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम् । वाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् । २ । पूर्वं तु वारुणं वक्त्रं कोटिसूर्यसमप्रभम् । दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् । ३ । अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् । अत्युग्रतेजोवपुषं भीषणं भयनाशनम् । ४ । पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महावलम् । सर्वनागप्रशमनं विषभूतादिकृन्तनम् । ५ । उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् । पातालसिंहवेतालज्वररोगादिकृन्त-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

नम् । ६ । ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् । येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम् । ७ । जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् । ध्यात्वा पञ्चमुखं रूढं हनुमन्तं दयानिधिम् । ८ । खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम् । मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् । ९ । भिन्दिपालं ज्ञानमुद्रां दशभिर्हरिपुङ्गवम् । एतान्यायुधजालानि धारयन्तं भजाम्यहम् । १० । प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् । दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । ११ । सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् । पञ्चास्यमच्युतमनेकविचित्रवर्णं वक्त्रं शशाङ्कशिखरं कपिराजवर्यम् ॥ पीताम्बरादिमुकुटैरुपशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि । १२ । मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् । शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर । १३ । ॐहरिमर्कट मर्कट मंत्रमिदं परिलिख्यति लिख्यति वामतले । यदि नश्यति नश्यति शत्रुकुलं यदि मुञ्चति मुञ्चति वामलता । १४ । ॐहरिमर्कटाय स्वाहा । ॐनमो भगवते पञ्चवदनाय पूर्वकपिमुखाय सकलशत्रुसंहरणाय स्वाहा । ॐनमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा । ॐनमो भगवते पञ्चवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा । ॐनमो भगवते पञ्चवदनायोत्तरमुखायादिवराहाय सकलसम्पत्कराय स्वाहा । ॐनमो भगवते पंचवदनायोर्ध्वमुखाय हयग्रीवाय सकलजीववशंकराय स्वाहा ॥ ॐअस्यश्रीपञ्चमुखहनुमन्मन्त्रस्य श्रीरामचन्द्र ऋषिः, अनुष्टुप्छन्दः पञ्चमुख वीरहनुमान् देवता, हनुमानितिबीजं, वायुपुत्र इति शक्तिः, अञ्जनीसुत इति

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

कीलकं, श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ "इति ऋष्यादिकं विन्यस्य" । ॐअञ्जनीसुताय अङ्गुष्ठाभ्यांनमः । ॐरुद्रमूर्तये तर्जनीभ्यांनमः । ॐवायुपुत्राय मध्यमाभ्यांनमः । ॐअग्निगर्भाय अनामिकाभ्यांनमः । ॐरामदूताय कनिष्ठिकाभ्यांनमः । ॐपञ्चमुखहनुमते करतलकरपृष्ठाभ्यांनमः । (इतिकरन्यासः) । ॐअञ्जनीसुताय हृदयायनमः । ॐरुद्रमूर्तये शिरसेस्वाहा । ॐवायुपुत्राय शिखायै वषट् । ॐअग्निगर्भाय कवचाय हुं । ॐरामदूताय नेत्रत्रयायवौषट् । ॐपञ्चमुखहनुमते अस्त्रायफट् ॥ "पञ्चमुखहनुमते स्वाहा" इतिदिग्बन्धः ॥ अथ ध्यानं ॥ वन्दे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं दिव्यालङ्करणं त्रिपञ्चनयनं दैदीप्यमानं रुचा । हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भाङ्कुशाद्रिं हलं खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम् । १ ॥ अथ मन्त्रः ॥ श्रीरामदूतायाञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लङ्कादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहलसकलब्रह्माण्डविश्वरूपाय सप्तसमुद्रनिर्लङ्घनाय पिङ्गलनयनायामितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय सञ्जीवनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहितरामवरप्रदाय षट् प्रयोगागमपञ्चमुखवीरहनुमन्मंत्रजपे विनियोगः ॥ ॐहरिमर्कटमर्कटाय बंबंबंबंबं वौषट्स्वाहा । ॐहरिमर्कटमर्कटाय फंफंफंफंफंफट् स्वाहा । ॐहरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणायस्वाहा । ॐहरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षितसकलसम्पत्कराय स्वाहा । ॐहरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तम्भनायस्वाहा । ॐहरिमर्कट-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मर्कटाय ॐटंटंटंटंटं कूर्ममूर्तये पञ्चमुखवीरहनुमते परयन्त्रपरतन्त्रो-च्चाटनायस्वाहा। ॐकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफं-बंभंमंयंरंलंवंशंषंसंहंळंक्षंस्वाहा। इति दिग्बन्धः॥ ॐपूर्वकपिमुखाय पञ्चमुखहनुमते टंटंटंटंटं सकलशत्रुसंहरणायस्वाहा। ॐदक्षिण-मुखाय पञ्चमुखहनुमते करालवदनाय नरसिंहाय ॐह्रांह्रींह्रूंह्रैं-ह्रौंह्रः सकलभूतप्रेतदमनायस्वाहा। ॐपश्चिममुखाय गरुडान-नाय पञ्चमुखहनुमते मंमंमंमंमं सकलविषहरायस्वाहा। ॐउत्त-रमुखायादिवराहायादिवराहाय लंलंलंलंलं नृसिंहाय नीलकण्ठ-मूर्तये पञ्चमुखहनुमतेस्वाहा। ॐऊर्ध्वमुखाय हयग्रीवाय रुंरुंरुं-रुंरुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकायस्वाहा। ॐअञ्जनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्र-कृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पञ्चमुखवीरहनुमतेस्वाहा। भूतप्रेतपिशाचब्रह्मराक्षसशाकिनी-डाकिन्यन्तरिक्षग्रहपरयंत्रपरतन्त्रोच्चाटनायस्वाहा। सकल-प्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते श्रीरामचन्द्रवरप्रसादाय जंजंजंजंजंस्वाहा॥ इदं कवचं पठित्वातु महाकवचं पठेन्नरः। एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम्। १५। द्विवारं तु पठे-न्नित्यं पुत्रपौत्रप्रवर्धनम्। त्रिवारं तु पठेन्नित्यं सर्वसम्पत्करं शुभम्। १६। चतुर्वारं पठेन्नित्यं सर्वलोकवशंकरम्। षड्वारं पठेन्नित्यं सर्वदेववशङ्करम्।१७। सप्तवारं पठेन्नित्यं सर्वसौभा-ग्यदायकम्।१८। अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम्। च नववारं पठेन्नित्यं राजभोगमवाप्नुयात्। १९। दशवारं पठे-न्नित्यं त्रैलोक्यज्ञानदर्शनम्। रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवे-द्ध्रुवम्॥ २०॥ कवचस्मरणेनैव महाबलमवाप्नुयात्। २१। इति श्रीसुदर्शनसंहितायां श्रीरामचन्द्रसीताप्रोक्तं श्रीपञ्चमुखहनुमत्कवचं॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

अथ वज्रपञ्जराख्यसूर्यकवचम् ॥

भैरवः ॥ यो देवदेवो भगवान्भास्करो महसां निधिः । गायत्रीनायको भास्वान् सवितेति प्रगीयते ॥ तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् । सर्वमन्त्रमयं गुह्यं मूलविद्यारहस्यकम्[२] ॥ सर्वपापहरं देवि दुःखदारिद्र्यनाशनम् । महाकुष्ठहरं पुण्यं सर्वरोगनिवर्हणम्[३] । सर्वशत्रुसमूहघ्नं सङ्ग्रामे विजयप्रदम् । सर्वतेजोमयं दिव्यं देवदानवपूजितम्[४] ॥ रणे राजभये घोरे सर्वोपद्रवनाशनम् । मातृकावेष्टितं वर्म भैरवाननिर्गतम्[५] ॥ ग्रहपीडाहरं देवि सर्वसङ्कटनाशनम् । धारणादऽस्य देवेशि ब्रह्मा लोकपितामहः[६] ॥ विष्णुर्नारायणो देवि रणे दैत्याञ्जयत्यपि । शङ्करः सर्वलोकेशो वासवोपि दिवस्पतिः[७] । ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः । मन्त्रात्मकं परं वर्म सवितुः सारमुत्तमम्[८] ॥ यो धारयेद्भुजे मूर्ध्नि[९] रविवारे महेश्वरि । स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥ बहुनोक्तेन किं देवि कवचस्याऽस्य धारणात् । इह लक्ष्मीधनारोग्यवृद्धिर्भवति नान्यथा[१०] ॥ परत्र परमा मुक्तिर्देवानामपि दुर्लभा । कवचस्यास्य देवेशि मूलविद्यामयस्य च[११] ॥ वज्रपञ्जरकाख्यस्य मुनिर्ब्रह्मा समीरितः । गायत्री छन्द इत्युक्तं देवता सविता स्मृता[१२] ॥ मायाबीजं शरच्छक्तिर्नमः कीलकमीश्वरि । सर्वार्थसाधने देवि विनियोगः प्रकीर्तितः[१३] ॥ अस्य श्रीवज्रपञ्जराख्यसूर्यकवचस्य, ब्रह्माऋषिः, गायत्रं छन्दः, सविता देवता, ह्रीं बीजं, सः शक्तिः, नमः कीलकं, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं, अमुककामनासिद्ध्यर्थे पाठे विनियोगः ॥ ध्यानं ॥ प्रत्यक्षदेवं० ॥ अंआंइंईं शिरः पातु आंसूर्यो मन्त्रविग्रहः । उंऊंऋंॠं ललाटं मे ह्रांरविः पातु चिन्मयः ॥ ऌंॡंएंऐं पातु नेत्रे ह्रींम-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

माऽरुणसारथिः। ओंऔंअंअः श्रुती पातु सः सर्वजगदीश्वरः ॥ कंखंगंघं पातु गण्डौ सं सूरः सुरपूजितः। चंछंजंझं च मे नासां पातु मामऽर्यमा प्रभुः॥ टंठंडंढं मुखं पायाद्यं योगीश्वरपूजितः। तंथंदंधं गलं पातु नंनारायणवल्लभः॥ पंफंबंभं ममस्कन्दौ पातु मां महसां निधिः॥ यंरंलंवं भुजं पातु मूलं सकलनायकः। शंषंसंहं पातु वक्षो मूलमन्त्रमयो ध्रुवः॥ लक्षः कुक्षिं सदापातु ग्रहनाथो दिनेश्वरः॥ ङंञंणंनंमं मे पातु पृष्ठं दिवसनायकः॥ अंआंइंईं उंऊंऋंॠं नाभिं पातु तमोपहः। लृंलॄंएंऐंओंऔंअंअः लिङ्गं मेऽव्याद्ग्रहेश्वरः॥ कंखंगंघंचंछंजंझं कटिं भानुर्ममाऽवतु। टंठंडंढंतंथंदंधं जानू भास्वान्ममावतु॥ पंफंबंभंयंरंलंवं जङ्घे मेऽव्याद्दिवाकरः। शंषंसंहंलंक्षं पातु मूलं पादौस्त्रयीतनुः॥ ङंञंणंनंमं मे पातु सविता सकलं वपुः। सोमः पूर्वे च मां पातु भौमोऽग्नौ मां सदाऽवतु॥ बुधो मां दक्षिणे पातु नैर्ऋत्यां गुरुरेव माम्। पश्चिमे मां सितः पातु वायव्यां मां शनैश्चरः॥ उत्तरे मां तमः पायादैशान्यां मां शिखी तथा। ऊर्ध्वं मां पातु मिहिरो मामऽधस्ताज्जगत्पतिः। प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः। सायं वेदप्रियः पातु निशीथे निष्कलापतिः॥ सर्वत्र सर्वदा पातु सूर्यो मां चक्रनायकः। रणे राजकले द्यूते विवादे शत्रुसङ्कटे॥ सङ्ग्रामे च ज्वरे घोरे पातु मां सविता प्रभुः॥ ॐॐॐउउऊंउऊंहसमयः सूर्योऽवतान्मां भयाद्ध्रांह्रीं-ह्रींहहहाहसौहसहसौ हंसोऽवतात्सर्वतः। सःसःसःससः नृपा-द्वनचराच्चौराद्रणात्सङ्कटात्पायान्मां कुलनायकोऽपि सविता ॐह्रींहसौ सर्वदा॥ द्रांद्रींद्रूं दधतं तथा च तरणिभां भैर्भया-द्भास्करो रांरींरूंरुरुरूंरविज्वरभयात्कुष्ठाच्च शूलामयात्।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

अंअंआंविविवीं महामहमयं मां पातु मार्तण्डको मूर्ध्न्योऽग्यास्त-
तनुः सदाऽवतु परंहंसः सहस्रांशुमान्[16] ॥ इति श्रीकवचं दिव्यं
वज्रपञ्जरकाभिधम् । सर्वदेवरहस्यं च मातृकामन्त्रवेष्टितम् ॥
महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् । गुह्यं यशस्करं पुण्यं
सर्वश्रेयस्करं शिवे[2] ॥ लिखित्वा रविवारे तु तिष्ये वा जन्मभे
प्रिये । अष्टगन्धेन दिव्येन सुधाक्षीरेण पार्वति[3] ॥ अर्कक्षीरेण
पुण्येन भूर्जपत्रे महेश्वरि । कनके काष्ठलेखन्या कवचं भास्क-
रोदये[4] ॥ श्वेतपत्रेण रक्तेन श्यामेन वीष्टयेत्कुटिम् । सौवर्णेनाथ
संवीष्य धारयेन्मूर्ध्नि वा भुजे[5] ॥ रणे रिपूञ्जयेद्देवि वादीन्सदसि
जेष्यति । राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत्[6] ॥ कण्ठस्था
गुटिका देवि कुक्षिस्था रोगनाशिनी । शिरःस्था गुटिका देवि
राजलोकवशङ्करी[7] ॥ भुजस्था धनदा देवि तेजोबुद्धिविवर्धिनी ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याऽङ्गना[8] ॥ कण्ठे सा
धारयेन्नित्यं बहुपुत्रान्प्रजायते । यस्य देहे भवेन्नित्यं गुटिकैका
महेश्वरि[9] ॥ महास्त्राणीन्द्रमुख्यानि ब्रह्मास्त्रादीनि पार्वति । तद्देहं
प्राप्य व्यर्थानि भविष्यन्ति न संशयः[10] ॥ त्रिकालं यः पठेन्नित्यं
कवचं वज्रपञ्जरम् । तस्य सद्यो महादेवि सविता वरदो भवेत्[11] ॥
अज्ञानात्कवचो देवि पूजयेद्यस्त्रयीतनुम् । तस्य पूजान्वितं पुण्यं
जन्मकोटिषु निष्फलम्[12] ॥ दशावर्तं पठेद्धर्म सप्तम्यां रविवासरे ।
महाकुष्ठार्दितो देवि मुच्यते नात्र संशयः[13] ॥ नीरोगो यः पठेद्धर्म
दरिद्रो वज्रपञ्जरम् । लक्ष्मीवाञ्जायते देवि सद्यः सूर्यप्रसादतः[14] ॥
भक्त्या यः प्रपठेद्देवि कवचं प्रत्यहं प्रिये । इह लोके सुखं
भुक्त्वा देहान्ते मुक्तिमाप्नुयात्[15] ॥ इतिश्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये
वज्रपञ्जराख्यं सूर्यकवचम् ॥ श्रीकृष्णार्पणमस्तु ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

१० कर्मकाण्डपुस्तकं नं. १ (संवत्सरिकपितृक्रियोपयोगि) ।।।=)

११ कर्मकाण्डपुस्तकं नं. २ (नं० १ तथा साष्टकश्राद्ध-गायत्रीब्राह्मण-श्राद्धब्राह्मण-पूयमानब्राह्मण-रुचिस्तवपावमानीकूष्मण्डादिविषयैरलंकृतं विस्तीर्णतया स्फुटं कलशरेखोल्लसितं च .... १।)

१२ कर्मकाण्डपुस्तकं नं. ३ (विष्णुबलिविधानादियुतं) मुद्रणावस्थायां वर्तते ... ... १।)

१३ वेदकल्पद्रुमः (हवनक्रियोपयोगी तथा चातुर्मास्योद्यापनविधि-मूलगण्डान्तशान्ति-ग्रहशान्ति-अभिषेकमन्त्र-कलशग्रहयोरुत्पत्तिस्तयोः स्थापनविधिश्च-ग्रहबलिविधानं-ग्रहक्षमापन-शकुंप्रतिष्ठा-वेश्मप्रतिष्ठा-पञ्चगव्यविधि-तुलादानकन्यासंस्काराद्यात्मकः) ... ... १।)

१४ मेखलापुस्तकम् (ऋचक-विवाहपद्धति-उपनयनपद्धति "चतुर्विंशतिसंस्कारात्मक" अग्निकुण्डपूजा-कन्यासंस्कारनान्दीमुखश्राद्ध-इहकीलिपूजाद्यात्मकम्) ... १।।)

१५ वटुकपूजा(कलशस्थापन-वैश्वदेव-व्याहृत्यादियुता काश्मीरिकानां गृहस्थाश्रमस्थितानां धार्मिकाणां शिवरात्रिदिनेवागूरद्वादशी-त्रयोदशीपूजादियुता)अतीवोपयोगिनी ।=)

१६ पार्थिवेश्वरपूजा (कलशस्थापन-वैश्वदेवव्याहृत्यादियुता शिवोपासकानामतीवोपयोगिनी) ... ... ।=)

१७ उपदेशपञ्चकम् (शङ्करस्वामिविरचितं-रत्नप्रभाटीकया चालङ्कृतम् सम्पूर्णवासिष्ठाशयगर्भं उपनिषत्सारभूतं अतीवोपयोगि-मुमुक्षूणाम्) ... ... ≡)

१८ योगवासिष्ठसारः (मूलमात्रम्) ... ... ≡)

१९ भक्तिविवेकसारः (अज्ञानबोधिनी-सटीकाभिः प्रह्लाद-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मुचुकुन्दस्तुति-रासक्रीडा-पञ्चाध्यायी-गोपीस्तुति-गोपीयुगलगीताभ्रमरगीताभिक्षुगीताभिश्चसंवलितस्तथा गणेशस्तुतिशैवीयप्रातःकृत्यविधि-त्रिपुरापूजापद्धति-गायत्रीस्तुतिमुकुन्दमाला-कृष्णलीलास्तुति-गोविन्दाष्टक-जयनारायणभजगोविन्द-अङ्गनामङ्गना-विचारपञ्जरिकाकृष्णजन्मस्तुति-आर्तत्राणस्तोत्र-नारायणोपनिषत् शैवीब्राह्मीविद्यागलेकलितकालिमशिवस्तोत्र-जटायुस्तुति-त्रिपुराशारिकाज्वालाराज्ञीनां स्तुतिः-सूर्यादिनवग्रहाणां च पृथक् २ स्तुतिः पराप्रवेशिकात्मकः) ॥=)

२० भवानीनामसहस्रस्तुतिः नामावली च इन्द्राक्षीसहिता ।–)

२१ विष्णुसहस्रनामस्तोत्रम् (नामावलीयुतं गोविन्दाष्टकविश्वेश्वराय नरकार्णवतारणाय इति शिवस्तुतिश्च) ।–)

२२ राज्ञी-ज्वाला-शारिका-सहस्रनामस्तोत्रम् (राज्ञीज्वाला-शारिकागणेशानां सहस्रनामावली च तथा राज्ञीस्तवराज-राज्ञीस्तुति-ज्वालास्तोत्र-शारिकास्तोत्राद्यात्मकम्) ॥–)

२३ आदित्यहृदयम् (चिदऽचिदिति गणेशस्तोत्र-मातृभक्तिस्तुतिः-मातृदेवीलीलास्तुतिः—राज्ञीस्तोत्र-राज्ञीकवच-आदित्यहृदयाऽपराजिताविद्यात्मकम्) ... ... ।–)

२४ कलशस्थापनोद्धारः (देवपितृक्रिययोरतीवोपयोगी)... –)

२५ शिवसूर्ययोः सहस्रनामावली (नरकोत्तरण-हनूमन्नारायणसूर्याणां कवचात्मिका) ... ... ।–)

२६ काश्मीरज्योतिषसंग्रहः (मूहूर्तविलोकन-वर्षपत्र-जन्मपत्रोपयोगिकः) ... ... ॥)

Printed by Ramchandra Yesu Shedge, at the Nirṇaya Sagar Press, 26–28, Kolbhat Lane, Bombay 2.
Published by Keshavbhatta, Patha Shala Teacher, at Nonar, Post Mahashahibhag, Srinagar, Kashmir.

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri